लोहं, क्ली, अगुरु। इत्यमरः॥ (अथास्य पर्य्यायः।
"अगुरुप्रवरं लोहं राजार्हं योगजन्तथा।
वंशिकं क्रिमिजं वापि क्रिमिजग्धमनार्यकम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

लोहः, पुं क्ली, (लूयतेऽनेनेति। लू+बाहुलकात् हः।) लौहम्। जोङ्गकम्। सर्व्वतैजसम्। इति मेदिनी। हे, ८॥ रुधिरम्। इति राजनिर्घण्टः॥ अथ मुण्डलोहस्य पर्य्यायः। मुण्डम् २ मुण्डायसम् ३ दृषत्सारम् ४ शिलात्मजम् ५ अश्मजम् ६ कृषिलोहम् ७ आरम् ८ कृष्णायसम् ९॥ अथ तीक्ष्णलोहस्य पर्य्यायः। तीक्ष्णम् २ शस्त्रायसम् ३ शस्त्रम् ४ पिण्डम् ५ पिण्डायसम् ६ शठम् ७ आयसम् ८ निशितम् ९ तीव्रम् १० खड्गम् ११ मुण्डजम् १२ अयः १३ चित्रायसम् १४ चीनजम् १५। अस्य गुणाः। रूक्षत्वम्। उष्णत्वम्। तिक्तत्वम्। वातपित्तकफप्रमेहपाण्डुशूलनाशित्वम्। तीक्ष्णत्वम्। मुण्डाधिकगुणत्वञ्च। इति राजनिर्घण्टः॥ * ॥ अथ लोहस्योत्पत्तिनामलक्षणगुणाः।
"पुरा लोमिलदैत्यानां निहतानां सुरैर्युधि।
उत्पन्नानि शरीरेभ्यो लोहानि विविधानि च॥
लोहोऽस्त्री शस्त्रकं तीक्ष्णं पिण्डं कालायसायसी।
गुरुता दृढतोत्क्लेदकफदाहस्य कारिता।
अश्मदोषः सुदुर्गन्धो दोषाः सप्तायसस्य तु॥
लोहं तिक्तरसं शीतं मधुरं तुवरं गुरु।
रूक्षं वयस्यं चक्षुष्यं लेखनं वातलं जयेत्॥
कफं पित्तं गरं शूलं शोथार्शःप्लीहपाण्डुताः।
मेदोमेहक्रमीन् कुष्ठं तत्किट्टं तद्वदेव हि॥
षण्डत्वकुष्ठामयमृत्युदं भवेत्
हृद्रोगशूलौ कुरुतेऽश्मरीञ्च।
नानारुजाश्चापि तथा प्रकोपं
करोति हृल्लासमशुद्धलोहम्॥
जीवहारि मदकारि चायसं
चेदशुद्धिमदसंस्कृतं ध्रुवम्।
पाटवं न तनुते शरीरके
दारुणां हृदि रुजाञ्च यच्छति॥"*॥
तत्र सारलोहस्य लक्षणं गुणाश्च।
"चमाभ्रञ्छिखराकाराश्यङ्गान्यस्मिन लेपिते।
लोहे स्युर्यत्र सूक्ष्माणि तत्सारमभिधीयते॥
लोहं साराह्वयं हन्याद्ग्रहणीमतिसारकम्।
अर्द्धसर्व्वाङ्गजं वातं शूलञ्च परिणामजम्।
छर्द्दिञ्च पीनसं पित्तं श्वासमाशु व्यपोहति॥"
अथ कान्तलोहस्य लक्षणं गुणाश्च।
"यत्पात्रे न प्रसरति जले तैलबिन्दुः प्रतप्ते
हिङ्गुर्गन्धं त्यजति च निजं तिक्ततां निम्बकल्कः।
तप्तं दुग्धं भवति शिखराकारकं नैति भूमिं
कृष्णाङ्गः स्यात् सजलचणकः कान्तलोहं तदुक्तम्॥
गुल्मोदरार्शःशूलाममामवातं भगन्दरम्।
कामलाशोथकुष्ठानि क्षयं कान्तमयो जयेत्॥
प्लीहानमम्लपित्तञ्च यकृच्चापि शिरोरुजम्।
सर्व्वान्रोगान् विजयते कान्तलोहं न संशयः।
बलं वीर्य्यं वपुःपुष्टिं कुरुतेऽग्निं विवर्द्धयेत्॥"
अथ किट्टी।
"ध्मायमानस्य लोहस्य मलं मण्डूरमुच्यते।
लोहसिंहानिका किट्टी सिंहानञ्च निगद्यते॥
यल्लोहं यद्गुणं प्रोक्तं तत्किट्टमपि तद्गुणम्॥"
अथ लोहस्याशुद्धस्य दोषमाह।
"षण्डत्वकुष्ठामयमृत्युकारि
हृद्रोगशूलौ कुरुतेऽश्मरीञ्च।
नानारुजानाञ्च तथा प्रकोपं
कुर्य्याच्च हृल्लासमशुद्धलोहम्॥"
अथ लोहस्य दोषशान्तये शोधनमभिधीयते।
"पत्तलीकृतपत्राणि लोहस्याग्नौ प्रतापयेत्।
निषिञ्चेत्तप्ततप्तानि तैले तक्रे च काञ्जिके॥
गोमूत्रे च कुलत्थानां कषाये च त्रिधा त्रिधा।
एवं लोहस्य पत्राणां विशुद्धिः संप्रजायते॥"
अथ लोहस्य मारणविधिः।
"शुद्धलोहभवं चूर्णं पातालगरुडीरसैः।
मर्द्दयित्वा पुटेद्वह्नौ दद्यादेवं पुटद्वयम्॥
पुटत्रयं कुमार्य्याश्च कुठारच्छिन्निकारसैः।
पुटषट्कं ततो दद्यादेवं तीक्ष्णमृतिर्भवेत्॥"
अन्यच्च।
"चिपेद्द्वादशमांशेन दरदं तीक्ष्णचूर्णतः।
मर्द्दयेत् कन्यकाद्राविर्य्यामयुग्मं ततः पुटेत्।
एवं सप्तपुटैर्मृत्युं लोहचूर्णमवाप्नुयात्॥
सत्योऽनुभूतो योगीन्द्रैः क्रमोऽन्यो लोहमारणे।
कथ्यते रामराजेन कौतूहलधियाधुना॥
सूतकाद्द्विगुणं गन्धं दत्त्वा कुर्य्याच्च कज्जलीम्।
द्वयोः समं लौहचूर्णं मर्द्दयेत् कन्यकाद्रवैः॥
यामयुग्मं ततः पिण्डं कृत्वा ताम्रस्य पात्रके।
घर्म्मे धृत्वा रुवुकस्य पत्रैराच्छादयेद्बुधः॥
यामद्वयाद्भवेदुष्णं धान्यराशौ न्यसेत्ततः।
दत्त्वोपरि शरावञ्च त्रिदिनान्ते समुद्धरेत्॥
पिष्ट्वा च गालयेद्वस्त्रादेवं वारितरं भवेत्।
दाड़िमस्य दलं पिष्ट्वा तच्चतुर्गुणवारिणा॥
तद्दवेनायसश्चूर्णं सन्नीयात् प्लावयेदपि।
आतपे शोषयेत्तच्च पुटेदेव पुनः पुनः।
एकविंशतिवारैस्तन्म्रियते नात्र संशयः।
एवं सर्व्वाणि लोहानि स्वर्णादीन्यपि मारयेत्॥"
एवं मारितलोहस्य गुणाः।
"लोहं तिक्तं सरं शीतं कषायं मधुरं गुरु।
रूक्षं वयस्यं चक्षुष्यं लेखनं वातलं जयेत्।
कफं पित्तं गरं शूलं शोफार्शःप्लीहपाण्डुताः।
मेदोमेहक्रमीन् कुष्ठं तत्किट्टं तद्वदेव हि॥
गुञ्जामेकां समारभ्य यावत् स्युर्नवरक्तिकाः।
तावल्लोहं समश्नीयाद्यथादोषानलं नरः॥
कुष्माण्डं तिलतैलञ्च माषान्नं राजिकान्तथा।
मद्यमम्लरसञ्चैव वर्जयेल्लोहसेवकः॥"
इति भावप्रकाशः॥
लोहपात्रे भक्षणनिषेधो यथा,—
"यदा तु आयसे पात्रे पक्वमश्नाति वै द्विजः।
स पापिष्ठोऽपि भुङ्क्तेऽन्नं रौरवे परिपच्यते॥"
इति मत्स्यसूक्ततन्त्रम्॥
अपि च।
"अयःपात्रे पयःपानं गव्यं सिद्धान्नमेव च।
भ्रष्टादिकं मधु गुड़ं नारिकेलोदकन्तथा॥
फलं मूलञ्च यत्किञ्चिदभक्ष्यं मुनिरब्रवीत्॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम्॥
(अश्मन एवास्य उत्पत्तिः श्रूयते। यथा, मनुः। ९। ३२१।
"अद्भ्योऽग्निर्ब्रह्मतः क्षत्रमश्मनो लोहमुत्थितम्।
तेषां सर्व्वत्रगं तेजः स्वासु योनिषु शाम्यति॥"
पुं, छागः। स तु लक्षणान्वितः कृष्णवर्णो रक्तवर्णो वा। यथा, मनुः। ३। २७२।
"कालशाकं महाशल्काः खड्गलोहामिषं मधु।
आनन्त्यायैव कल्पन्ते मुन्यन्नानि च सर्व्वशः॥"
पार्व्वत्यजातिविशेषः। यथा, महाभारते। २। २७। २५।
"लोहान् परमकाम्बोजानृषिकानुत्तरानपि।
सहितांस्तान् महाराज व्यजयत् पाकशासनिः॥"
रक्तवर्णे, त्रि। यथा, महाभारते।९।१३६।२३।
"भ्रमतश्च वराहस्य लोहस्य प्रमुखे समम्।
पञ्चबाणान् सुसंयुक्तान् स मुमोचैकबाणवत्॥")

लोहकण्टकः, पुं, (लोहवत् कण्टकं यत्र।) मदनवृक्षः। इति शब्दचन्द्रिका॥ लौहमयकण्टकञ्च॥ (यथा, आर्य्यासप्तशत्याम्।४७४।
"सखि लोहकण्टकनिभस्तथा तथा मदनविशिखोऽपि॥")

लोहकान्तं, क्ली, (लोहः कान्तोऽस्येति।) अयस्कान्तम्। इति राजनिर्घण्टः॥

लोहकारः, पुं, (लोहं लोहमयं शस्त्रादि करोतीति। कृ+अण्।) लौहकारकः। इति हलायुधः॥ (यथा, गो० रामायणे।२।९०।२३।
"प्रख्यातास्चर्म्मकाराश्च लोहकारास्तथैव च॥")

लोहकारकः, पुं, (लोहं तन्मयशस्त्रादि करोतीति। कृ+ण्वुल्।) वर्णसङ्करजातिविशेषः। कामार इति भाषा। तत्पर्य्यायः। व्योकारः २ इत्यमरः॥ लौहकारः ३ अयस्कारः ४ कर्म्मकारः ५ कर्म्मारः ६। इति भरतरमणौ॥ तस्योत्पत्तिर्यथा।
"गोपालात्तन्त्रवाय्यां वै कर्म्मकारोऽप्यभूत् सुतः॥"
इति पराशरपद्धतिः॥

लोहकिट्टं, क्ली, (लोहस्य किट्टम्।) लोहमलम्। तत्पर्य्यायः। किट्टम् २ लोहचूर्णम् ३ अयोमलम् ४ लोहजम् ५ कृष्णचूर्णम् ६ लोष्टम् ७ लोहमलम् ८। (यथा, सुश्रुते। ६। ४४।
"मूत्रस्थितं सैन्धवसंप्रयुक्तं
मांसं पिबेद्वापि हि लोहकिट्टम्॥")
अस्य गुणाः। मधुरत्वम्। कटुत्वम्। उष्णत्वम्। क्रिमिवातपक्तिशूलमहच्छूलमेहगुल्मशोफनाशित्वञ्च। इति राजनिर्घण्टः॥ अपि च।